International Journal of Sanskrit Research 2019; 5(2): 45-46

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(2): 45-46
© 2019 IJSR
www.anantaajournal.com
Received: 15-01-2019
Accepted: 19-02-2019

**Moumita Chowdhury**
Designation – Guest Lecturer
In Sanskrit, R.B.C College For Women, Naihati, West Bengal, India

**Correspondence**
**Moumita Chowdhury**
Designation – Guest Lecturer
In Sanskrit, R.B.C College For Women, Naihati, West Bengal, India

# ध्वनिवादिणाम् मते ध्वनितत्त्वम्

**Moumita Chowdhury**

**प्रस्तावना**

शब्दार्थशरीरस्य काव्यस्य गुणालंकारादयो: अनेकधर्मा: सन्ति । ये काव्यशोभाम् सम्पादयन्ति । तथापि शरीरं अतिरिच्य अपि किमपि तत्त्वमस्ति, यद्बलात् जीव: इति उच्यते । यथा वा जीव: जीव: भवति । अनेन प्रकारेण शब्दार्थौ विना अपि अस्ति किमपि तत्त्वम्, यद्बलात् काव्यं काव्यं भवति । यथा-आत्मन: सद्भावात् एव देही जीव: उच्यते । अनेन प्रकारेन काव्यस्य अपि आत्मा कश्चन अस्ति, यद्बलात् काव्यं काव्यं इत्युच्यते । स च आत्मा यथा अलंकारवादिणां मते अलंकार:, रीतिवादिणां मते रीति:, रसवादिणां मते रस:, तथा ध्वनिवादिणां मते ध्वनि: ।

प्राचीना: हि आलंकारिका: काव्ये भूय: भूय: गुणानाम् अलंकारानाम् वा काव्यस्य उत्कर्षविधायकताम् निश्चितवन्त: । यथा -

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णा: ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्या: ॥ इति ।

अस्मिन् श्लोके काव्यतत्त्वानां सुष्ठु प्रयोगं दृश्यते । अत्र मृगस्य कविप्रतिभया स्वभाववर्णनात् स्वभावोक्तिरलंकार: 'स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्' । अत्र नृपनिष्ठस्योत्साहस्य व्यञ्जनात् वीरो रस: 'उत्तमप्रकृतिर्वीर: उत्साहस्थायि-भावक:', तथा च मृगनिष्ठस्य भयस्याभिव्यञ्जनात् भयानक: रस: 'भयानको भय-स्थायि-भावो.'। अत्र गुणस्यापि उपस्थिति: अस्ति । अतएव सत्काव्ये सकलकाव्यतत्त्वानां उअपयोगिता वर्तते। किन्तु आनन्दवर्धनाचार्यात् प्राक् साहित्यसमाजे ध्वनितत्त्वम् प्रतिष्ठितम् नासीत् । यद्यपि अन्यत्र व्यकरणादिशास्त्रे ध्वनितत्त्वम् किञ्चित् प्रकाशितम् आसीत्। तथापि साहित्यसमाजे आलंकारिकै: तत् तत्त्वम् समादृतम् न आसीत् । हवुधै: य: समाम्नात पूर्व:। अत्र समाम्नातपूर्व इति पदे पूर्वपदस्य ग्रहणेन एव ज्ञायते अत्रैव प्रथमतया ध्वनितत्त्वम् न प्रकाशितम् किन्तु ध्वन्यालोकग्रन्थस्य आविर्भावात् पूर्वमपि ध्वनितत्त्वम् अन्यस्मिन् शास्त्रे प्रचलितम् आसीत् । किञ्च समाम्नात पूर्व इत्यत्र सम् इति उपसर्ग वर्तते, तस्य अर्थ भवति सम्यक्, आ-पूर्वात् 'म्ना अभ्यासे' इत्येवं अभ्यासार्थात् 'ना' धातो: क्त प्रत्येये आम्नात शब्द: निष्पन्न: भवति । एतेन एतद् सूचितं भवति ध्वनितत्त्वं वारं वारं शास्त्रान्तरे आलोचितमासीत् । सम्यक् इति एतस्य अर्थ: आदरेण सह इति । तेन पण्डिता: ध्वनितत्त्वं आदरेण उपदिष्टवन्त:, यद् वारं वारं आदरेण उपदिष्टं तदत्यन्तम् असत् इति

वक्तुं न शक्यते । अतएव अस्ति एव ध्वनितत्त्वम् । तदुक्तम् लोचनटीकायाम् - 'समाम्नातपूर्वः परम्परया इति। अविच्छिन्नेन प्रवाहेन . . . . व्यचष्टे च । सम्यक् आ-समन्तात् म्नातः प्रकटित इत्यनेन । '

किन्तु साहित्यसमाजे तदानीमपि ध्वनितत्त्वं न लब्धवत् इति बोद्धुम् शक्यते । अतएव आनन्दवर्धनाचार्यः त्रिविधान् पूर्वपक्षिणः उपस्थापितवान् -- अभाववादीनः, भाक्तवादीणः अनिर्वच्चनीयतावादीनः । तदुक्तम्

काव्यस्यात्मा ध्वनिरिति वुधैर्यः समाम्नातपूर्व-
स्तस्यभावं जगदुरपरे भाक्तमाहुस्तमन्ये ॥

प्रश्नः भवति काव्ये ध्वनितत्त्वम् अतिरिक्तपदार्थः इति कथं स्वीक्रियते? ध्वनिवादिणाम् मते ध्वनिः हि द्विविधः अभिधामूलः लक्षणामूलश्चेति । अत्र ध्वनिशब्देन व्यञ्जनावृत्तिः इति उच्यते । यः अर्थः केवलम् अभिधावृत्तिवलात् न लभ्यते । लक्षणावृत्तिवलादपि न लभ्यते । तथापि तादृशो तृतीयः कश्चन अर्थः सहृदयानाम् अनुभूतिगोचरः भवति । स च तृतीयः अर्थः व्यञ्जनावृत्तिवलाद् लभ्यते इति ध्वनिवादिणाम् आशयः । व्यञ्जनावृत्तिवलात् लभ्यमानः तृतीयः यः व्यङ्ग्यार्थः सोऽपि व्युत्पत्तिभेदेन ध्वनिशब्देनोच्यते । व्यङ्ग्यार्थोवशादेव सहृदयाण् हृदयः चमत्कृतः भवति, नान्यथा । अतएव व्यङ्ग्यार्थरूपं ध्वनिम् ते काव्यस्य आत्मरूपेन स्वीकुर्वन्ति ।

**सहायकग्रन्था**:


1. साहित्यदर्पणः, विश्वनाथः कविराजः, सम्पादकः उदयचन्द्रबन्दोपाध्यायः, संस्कृत वुक डिपो, कोलकाता, पुनर्मुद्रणम् २००५ ।
2. अलङ्कार-मञ्जुषा, सम्पादकः सच्चिदानन्दमुख्योपाध्यायः, साहित्यनिकेतनम्, २०१४।
3. अलङ्कारशास्त्रेतिहासः, सम्पादकः राजकुमारदधीचः, हंसा प्रकाशनम्, जयपुर, २०१२ ।
4. ध्वन्यालोकः, आनन्दवर्धनः, सम्पादिका जयश्री चट्टोपाध्यायः, संस्कृत पुस्तक भाण्डार, २००९ ।
5. काव्यप्रकाशः, मम्मटः, सम्पादिका विजया गोस्वामी, सदेशः, कोलकाता, पुनर्मुद्रणम् २००७ ।
6. ध्वन्यालोकः, आनन्दवर्धनः, सम्पादकः श्री सुवोधचन्द्रःसेनगुप्तः, श्री कालीपद भट्टाचार्यः, संस्कृत बुक डिपो, कोलकाता, पुनर्मुद्रणम् २०१३ ।